# Shri Agastyesha Lingashtakam

# શ્રીઅગસ્ત્યેશલિઙ્ગાષ્ટકમ્

## Document Information

Text title : Shri Agastyesha Lingashtakam 02 32

File name : agastyeshalingAShTakam.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-32

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીઅગસ્ત્યેશલિઙ્ગાષ્ટકમ્

શ્રીમત્પર્વતપુત્રિકાશ્રિતલસદ્વામાઙ્ગમિન્દૂજ્જ્વલ-
ત્કોટીરં કનકાદ્રિકાર્મુકધરં કલ્પદ્રુમાલાવલી-
સક્તોરઃસ્થલમન્તકાન્તકમનન્તાહીન્દ્રસદ્ભૂષણં
શ્રીગુણ્ટૂરિપુરાધિવાસમતુલાગસ્ત્યેશલિઙ્ગં ભજે ॥ ૧॥

ભક્તાભીષ્ટફલપ્રદં ભવહરં પાપૌઘવિચ્છેદનં
શક્રાદ્યષ્ટદિગીશસન્નુતપદં શુમ્ભદ્ગણાધીશ્વરમ્ ।
ગઙ્ગોત્તુઙ્ગતરઙ્ગિણીયુતજટાજૂટં મુનીન્દ્રાર્ચિતં
શ્રીગુણ્ટૂરિપુરાધિવાસમતુલાગસ્ત્યેશલિઙ્ગં ભજે ॥ ૨॥

માર્કણ્ડેયમુનીન્દ્રરક્ષણમજં મૃત્યુઞ્જયં શાશ્વતં
મત્તામર્ત્યવિરોધિગર્વનગરીદમ્ભોલિધારાયિતમ્ ।
વિત્તાધીશસખં વિયત્તલલસત્કેશં ત્રિલોકેશ્વરં
શ્રીગુણ્ટૂરિપુરાધિવાસમતુલાગસ્ત્યેશલિઙ્ગં ભજે ॥ ૩॥

ભૂમ્યાપોઽગ્નિસમીરણા(પ્રભઞ્જના)મ્બરલસત્સોમાર્કયજ્વા(સ્વાત્મા)ભિધૈ-
રષ્ટૈરિષ્ટવરપ્રદાનચતુરૈઃ સ્પષ્ટૈઃ સ્વરૂપૈઃ સદા ।
ભાસ્વન્તં જગતીતલે ગજહરં કર્પૂરગૌરં શિવં
શ્રીગુણ્ટૂરિપુરાધિવાસમતુલાગસ્ત્યેશલિઙ્ગં ભજે ॥ ૪॥

સૂર્યાગ્નીન્દુવિલોચનં સુરવરં ફાલાગ્નિભસ્મીકૃત-
પ્રદ્યુમ્નં પરમેશ્વરં ગુરુવરં કાલાગ્નિરુદ્રં હરમ્ ।
કણ્ઠાકલ્પવિલાસભાસુરમહાહાલાહલં શઙ્કરં
શ્રીગુણ્ટૂરિપુરાધિવાસમતુલાગસ્ત્યેશલિઙ્ગં ભજે ॥ ૫॥

શ્રીમદ્ભૂમિરથં વિરિઞ્ચિવિલસત્સૂતં નગાધીશસ-
ચ્ચાપં વિષ્ણુશરં રથાઙ્ગયુગલીભૂતાર્કચન્દ્રં શિવમ્ ।
પૂર્વામર્ત્યપુરત્રયાન્તકરણોદ્યુક્તં શિવાલિઙ્ગિતં
શ્રીગુણ્ટૂરિપુરાધિવાસમતુલાગસ્ત્યેશલિઙ્ગં ભજે ॥ ૬॥

દક્ષાક્ષુદ્રમખાગતામરગણાન્ તત્રત્યઋત્વિગ્વરાન્
ચન્દ્રં તચ્છ્વશુરં ભગં મુનિગણાનગ્નિં ચ દક્ષં લસત્ ।
સ્વેદોદ્ભૂતવિનીલદેહરુચિના વીરેણ સન્ત્રાસિતં(ત્રાસકં)
શ્રીગુણ્ટૂરિપુરાધિવાસમતુલાગસ્ત્યેશલિઙ્ગં ભજે ॥ ૭॥

શ્રીલક્ષ્મીશવિરિઞ્ચિપૂજિતપદં શુમ્ભત્ત્રિશૂલાયુધં
શ્રીમદ્ભૃઙ્ગિકુમારનન્દિગણપશ્રીવીરભદ્રાદિભિઃ ।
સર્વૈર્ભક્તિયુતૈર્મહાગણવરૈઃ સંસેવ્યમાનં સદા
શ્રીગુણ્ટૂરિપુરાધિવાસમતુલાગસ્ત્યેશલિઙ્ગં ભજે ॥ ૮॥

શ્રીકોપ્પરાજકુલવાર્ધિનિશાકરેણ
સ્તોત્રં કૃતં જગતિ સુબ્બયનામભાજા-
ગસ્ત્યેશ્વરસ્ય નિજભક્તજનાવનસ્ય
યો વૈ પઠેલ્લભતિ સોઽપિ સદા વિમુક્તિમ્ ॥ ૯॥

॥ ઇતિ શ્રીઅગસ્ત્યેશલિઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Agastyesha Lingashtakam*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*